# shrIShoDashIsahasranAmastotram

# શ્રીષોડશીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : ShoDashIsahasranAmastotra

File name : ShoDashIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Proofread by : Pankaj Dubey, PSA Easwaran

Source : vAmakeshvaratantre

Latest update : August 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીષોડશીસહસ્રનામસ્તોત્રમ્

॥ શ્રીમહાત્રિપુરસુન્દર્યૈ નમઃ ॥

॥ પૂર્વ પીઠિકા ॥

કૈલાસશિખરે રમ્યે નાનારત્નોપશોભિતે ।
કલ્પપાદપમધ્યસ્થે નાનાપુષ્પોપશોભિતે ॥ ૧॥

મણિમણ્ડપમધ્યસ્થે મુનિગન્ધર્વસેવિતે ।
કદાચિત્સુખમાસીનં ભગવન્તં જગદ્ગુરુમ્ ॥ ૨॥

કપાલખટ્વાઙ્ગધરં ચન્દ્રાર્ધકૃતશેખરમ્ ।
હસ્તત્રિશૂલડમરું મહાવૃષભવહનમ્ ॥ ૩॥

જટાજૂટધરન્દેવં કણ્ઠભૂષણવાસુકિમ્ ।
વિભૂતિભૂષણન્દેવં નીલકણ્ઠન્ત્રિલોચનમ્ ॥ ૪॥

દ્વીપિચર્મપરીધાનં શુદ્ધસ્ફટિકસન્નિભમ્ ।
સહસ્રાદિત્યસઙ્કાશં ગિરિજાર્દ્ધાઙ્ગભૂષણમ્ ॥ ૫॥

પ્રણમ્ય શિરસા નાથં કારણં વિશ્વરૂપિણમ્ ।
કૃતાઞ્જલિ પુટો ભૂત્વા પ્રાહૈનં શિખવાહનઃ ॥ ૬॥

॥ કાર્તિકેય ઉવાચ ॥

દેવદેવ જગન્નાથ! સૃષ્ટિસ્થિતિલયાત્મક ।
ત્વમેવ પરમાત્મા ચ ત્વં ગતિઃ સર્વદેહિનામ્ ॥ ૭॥

ત્વઙ્ગતિઃ સર્વલોકાનાં દીનાનાં ચ ત્વમેવ હિ ।
ત્વમેવ જગદાધારસ્ત્વમેવ વિશ્વકારણમ્ ॥ ૮॥

ત્વમેવ પૂજ્યઃ સર્વેષાં ત્વદન્યો નાસ્તિ મે ગતિઃ ।
કિં ગુહ્યમ્પરમં લોકે કિમેકં સર્વસિદ્ધિદમ્ ॥ ૯॥

કિમેકં પરમં શ્રેષ્ઠં કો યોગઃ સ્વર્ગમોક્ષદઃ ।
    વિના તીર્થેન તપસા વિના દાનૈર્વિના મખૈઃ ॥ ૧૦॥

વિના લયેન ધ્યાનેન નરઃ સિદ્ધિમવાપ્નુયાત્ ।
    કસ્માદુત્પદ્યતે સૃષ્ટિઃ કસ્મિંશ્ચ પ્રલયો ભવેત્ ॥ ૧૧॥

કસ્માદુત્તીર્યતે દેવ ! સંસારાર્ણવસઙ્કુટાત્ ।
    તદહં શ્રોતુમિચ્છામિ કથયસ્વ મહેશ્વર ! ॥ ૧૨॥

॥ ઈશ્વર ઉવાચ ॥

સાધુ સાધુ ત્વયા પૃષ્ટં પાર્વતીપ્રિયનન્દન ।
    અસ્તિ ગુહ્યતમમ્પુત્ર! કથયિષ્યામ્યસંશયમ્ ॥ ૧૩॥

સત્વં રજસ્તમશ્ચૈવ યે ચાન્યે મહદાદયઃ ।
    યે ચાન્યે બહવો ભૂતાઃ સર્વે પ્રકૃતિસમ્ભવાઃ ॥ ૧૪॥

સૈવ દેવી પરાશક્તિઃ મહાત્રિપુરસુન્દરી ।
    સૈવ પ્રસૂયતે વિશ્વં વિશ્વં સૈવ પ્રપાસ્યતિ ॥ ૧૫॥

સૈવ સંહરતે વિશ્વં જગદેતચ્ચરાચરમ્ ।
    આધારઃ સર્વભૂતાનાં સૈવ રોગાર્તિહારિણી ॥ ૧૬॥

ઇચ્છાજ્ઞાનક્રિયાશક્તિરબ્રહ્મવિષ્ણુશિવાત્મિકા ।
    ત્રિધા શક્તિસ્વરૂપેણ સૃષ્ટિસ્થિતિવિનાશિની ॥ ૧૭॥

સૃજ્યતે બ્રહ્મરૂપેણ વિષ્ણુરૂપેણ પાલ્યતે ।
    હ્રિયતે રુદ્રરૂપેણ જગદેતચ્ચરાચરમ્ ॥ ૧૮॥

યસ્યા યોનૌ જગત્સર્વમદ્યાપિ પરિવર્તતે ।
    યસ્યાં પ્રલીયતે ચાન્તે યસ્યાં ચ જાયતે પુનઃ ॥ ૧૯॥

યાં સમારાધ્ય ત્રૈલોક્યે સમ્પ્રાપ્યં પદમુત્તમમ્ ।
    તસ્યા નામસહસ્રં તુ કથયામિ શ‍ૃણુષ્વ તત્ ॥ ૨૦॥

॥ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીમહાત્રિપુરસુન્દરીસહસ્રનામસ્તોત્રમન્ત્રસ્ય
શ્રીભગવાન્ દક્ષિણામૂર્તિઃ ઋષિઃ । જગતીછન્દઃ ।
સમસ્તપ્રકટગુપ્તસમ્પ્રદાય કુલકૌલોત્તીર્ણનિર્ગર્ભરહસ્યાચિન્ત્યપ્રભાવતી
દેવતા । ૐ બીજમ્ । હ્રીં શક્તિઃ । ક્લીં કીલકમ્ ।

ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।pAThe

॥ ઋષ્યાદિ ન્યાસઃ ॥

ૐ શ્રીમહાત્રિપુરસુન્દરીસહસ્રનામસ્તોત્રમન્ત્રસ્ય
શ્રીભગવાન્ દક્ષિણામૂર્તિ ઋષયે નમઃ શિરસિ ।
ૐ જગતીચ્છન્દસે નમઃ મુખે।
ૐસમસ્તપ્રકટગુપ્તસમ્પ્રદાયકુલકૌલોત્તીર્ણનિર્ગર્ભરહસ્યાચિન્ત્યપ્રભાવતીદેવતાયૈ નમઃ હૃદયે ।
ૐ ૐ બીજાય નમઃ નાભૌ ।var વીજાય
ૐ હ્રીં શક્ત્યે નમઃ ગુહ્યે ।
ૐ ક્લીં કીલકાય નમઃ પાદયોઃ ।
ૐ ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગાય નમઃ સર્વાઙ્ગે ।pAThe

॥ ધ્યાનમ્ ॥

ૐ આધારે તરુણાર્કબિમ્બરુચિરં હેમપ્રભં વાગ્ભવમ્ ।
બીજં મન્મથમિન્દ્રગોપસદૃશં હૃત્પઙ્કજે સંસ્થિતમ્ ॥

વિષ્ણુબ્રહ્મપદસ્થશક્તિકલિતં સોમપ્રભાભાસુરમ્ ।
યે ધ્યાયન્તિ પદત્રયં તવ શિવે ! તે યાન્તિ સૌખ્યં પદમ્ ॥

॥ માનસ પૂજનમ્ ॥

ૐ લં પૃથિવ્યાત્મકં ગન્ધં
પરબ્રહ્મસ્વરૂપિણી શ્રીષોડશીદેવી પ્રીતયે સમર્પયામિ નમઃ ।
ૐ હં આકાશતત્ત્વાત્મકં પુષ્પં
પરબ્રહ્મસ્વરૂપિણી શ્રીષોડશીદેવી પ્રીતયે સમર્પયામિ નમઃ ।
ૐ યં વાયુતત્ત્વાત્મકં ધૂપં
પરબ્રહ્મસ્વરૂપિણી શ્રીષોડશીદેવી પ્રીતયે ઘ્રાપયામિ નમઃ ।
ૐ રં અગ્નિતત્ત્વાત્મકં દીપં
પરબ્રહ્મસ્વરૂપિણી શ્રીષોડશીદેવી પ્રીતયે દર્શયામિ નમઃ ।
ૐ વં જલતત્ત્વાત્મકં નૈવેદ્યં
પરબ્રહ્મસ્વરૂપિણી શ્રીષોડશીદેવી પ્રીતયે નિવેદયામિ નમઃ ।
ૐ સં સર્વતત્ત્વાત્મકં તામ્બૂલં
પરબ્રહ્મસ્વરૂપિણી શ્રીષોડશીદેવી પ્રીતયે સમર્પયામિ નમઃ ।

॥ મૂલપાઠઃ ॥

કલ્યાણી કમલા કાલી કરાલી કામરૂપિણિ ।
કામાખ્યા કામદા કામ્યા કામના કામચારિણી ॥ ૧॥

કાલરાત્રિર્મહારાત્રિ  કપાલી કામરૂપિણી । var કાલરાત્રિઃ મહારાત્રિઃ
કૌમારી કરુણા મુક્તિઃ કલિકલ્મષનાશિની ॥ ૨॥

કાત્યાયની કરાધારા કૌમુદી કમલપ્રિયા ।
કિર્તિદા બુદ્ધિદા મેધા નીતિજ્ઞા નીતિવત્સલા ॥ ૩॥

માહેશ્વરી મહામાયા મહાતેજા મહેશ્વરી ।
મહાજિહ્વા મહાઘોરા મહાદંષ્ટ્રા મહાભુજા ॥ ૪॥

મહામોહાન્ધકારઘ્ની મહામોક્ષપ્રદાયિની ।
મહાદારિદ્ર્યનાશા ચ મહાશત્રુવિમર્દિની ॥ ૫॥

મહામાયા મહાવીર્યા મહાપાતકનાશિની ।
મહામખા મન્ત્રમયી મણિપૂરકવાસિની ॥ ૬॥

માનસી માનદા માન્યા મનશ્ચક્ષૂરણેચરા ।
ગણમાતા ચ ગાયત્રી ગણગન્ધર્વસેવિતા ॥ ૭॥

ગિરિજા ગિરિશા સાધ્વી ગિરિસ્થા ગિરિવલ્લભા ।
ચણ્ડેશ્વરી ચણ્ડરૂપા પ્રચણ્ડા ચણ્ડમાલિની ॥ ૮॥

ચર્વિકા ચર્ચિકાકારા ચણ્ડિકા ચારુરૂપિણી ।
યજ્ઞેશ્વરી યજ્ઞરૂપા જપયજ્ઞપરાયણા ॥ ૯॥

યજ્ઞમાતા યજ્ઞભોક્ત્રી યજ્ઞેશી યજ્ઞસમ્ભવા ।
સિદ્ધયજ્ઞા ક્રિયાસિદ્ધિર્યજ્ઞાઙ્ગી યજ્ઞરક્ષિકા ॥ ૧૦॥

યજ્ઞક્રિયા ચ યજ્ઞા ચ યજ્ઞાયજ્ઞક્રિયાલયા ।
જાલન્ધરી જગન્માતા જાતવેદા જગત્પ્રિયા ॥ ૧૧॥

જિતેન્દ્રિયા જિતક્રોધા જનની જન્મદાયિની ।
ગઙ્ગા ગોદાવરી ચૈવ ગોમતી ચ શતદ્રુકા ॥ ૧૨॥

ઘર્ઘરા વેદગર્ભા ચ રેચિકા સમવાસિની ।
સિન્ધુર્મન્દાકિની ક્ષિપ્રા યમુના ચ સરસ્વતી ॥ ૧૩॥

ભદ્રા રાગા વિપાશા ચ ગણ્ડકી વિન્ધ્યવાસિની ।   var ભદ્રા ૧૦૦
નર્મદા તાપ્તી કાવેરી વેત્રવતી સુકૌશિકી ॥ ૧૪॥ varવેત્રવત્યા

મહેન્દ્રતનયા ચૈવ અહલ્યા ચર્મકાવતી ।
અયોધ્યા મથુરા માયા કાશી કાઞ્ચી અવન્તિકા ॥ ૧૫॥

પુરી દ્વારાવતી તીર્થા મહાકિલ્વિષનાશિની ।
પદ્મિની પદ્મમધ્યસ્થા પદ્મકિઞ્જલ્કવાસિની ॥ ૧૬॥

પદ્મવક્ત્રા ચકોરાક્ષી પદ્મસ્થા પદ્મસમ્ભવા ।
હ્રીઙ્કારી કુણ્ડલાધારા હૃત્પદ્મસ્થા સુલોચના ॥ ૧૭॥

શ્રીઙ્કારી ભૂષણા લક્ષ્મીઃ ક્લીઙ્કારી ક્લેશનાશિની ।
હરિવક્ત્રોદ્ભવા શાન્તા હરિવક્ત્રકૃતાલયા ॥ ૧૮॥

હરિવક્ત્રોપમા હાલા હરિવક્ષ:સ્થલાસ્થિતા ।
વૈષ્ણવી વિષ્ણુરૂપા ચ વિષ્ણુમાતૃસ્વરૂપિણી ॥ ૧૯॥

વિષ્ણુમાયા વિશાલાક્ષી વિશાલનયનોજ્જ્વલા ।
વિંશ્વેશ્વરી ચ વિશ્વાત્મા વિશ્વેશી વિશ્વરૂપિણી ॥ ૨૦॥

વિશ્વનાથા શિવારાધ્યા શિવનાથા શિવપ્રિયા ।
શિવમાતા શિવાખ્યા ચ શિવદા શિવરૂપિણી ॥ ૨૧॥

ભવેશ્વરી ભવારાધ્યા ભવેશી ભવનાયિકા ।
ભવમાતા ભવગમ્યા ભવકણ્ટકનાશિની ॥ ૨૨॥

ભવપ્રિયા ભવાનન્દા ભવાની ભવમોહિની ।
ગાયત્રી ચૈવ સાવિત્રી બ્રહ્માણી બ્રહ્મરૂપિણી ॥ ૨૩॥

બ્રહ્મેશી બ્રહ્મદા બ્રહ્મા બ્રહ્માણી બ્રહ્મવાદિની ।
દુર્ગસ્થા દુર્ગરૂપા ચ દુર્ગા દુર્ગાર્તિનાશિની ॥ ૨૪॥

સુગમા દુર્ગમા દાન્તા દયા દોગ્ધ્રી દુરાપહા ।
દુરિતઘ્ની દુરાધ્યક્ષા દુરા દુષ્કૃતનાશિની ॥ ૨૫॥

પઞ્ચાસ્યા પઞ્ચમી પૂર્ણા પૂર્ણપીઠનિવાસિની । var પૂર્ણપીઠનિવાસિની ૨૦૦
સત્ત્વસ્થા સત્ત્વરૂપા ચ સત્ત્વગા સત્ત્વસમ્ભવા ॥ ૨૬॥

રજસ્થા ચ રજોરૂપા રજોગુણસમુદ્ભવા ।
તમસ્થા ચ તમોરૂપા તામસી તામસપ્રિયા ॥ ૨૭॥

તમોગુણસમુદ્ભૂતા સાત્વિકી રાજસી કલા ।
કાષ્ઠા મુહૂર્તા નિમિષા અનિમેષા તતઃ પરમ્ ॥ ૨૮॥

અર્ધમાસા ચ માસા ચ સંવત્સરસ્વરૂપિણી ।
યોગસ્થા યોગરૂપા ચ કલ્પસ્થા કલ્પરૂપિણી ॥ ૨૯॥

નાનારત્નવિચિત્રાઙ્ગી નાનાऽऽભરણમણ્ડિતા ।
વિશ્વાત્મિકા વિશ્વમાતા વિશ્વપાશવિનાશિની ॥ ૩૦॥

વિશ્વાસકારિણી વિશ્વા વિશ્વશક્તિવિચારણા ।
જપાકુસુમસઙ્કાશા દાડિમીકુસુમોપમા ॥ ૩૧॥

ચતુરઙ્ગી ચતુર્બાહુશ્ચતુરાચારવાસિની ।
સર્વેશી સર્વદા સર્વા સર્વદાસર્વદાયિની ॥ ૩૨॥

માહેશ્વરી ચ સર્વાદ્યા શર્વાણી સર્વમઙ્ગલા ।
નલિની નન્દિની નન્દા આનન્દાનન્દવર્દ્ધિની ॥ ૩૩॥

વ્યાપિની સર્વભુતેષુ ભવભારવિનાશિની ।
સર્વશ‍ૃઙ્ગારવેષાઢ્યા પાશાઙ્કુશકરોદ્યતા ॥ ૩૪॥

સૂર્યકોટિસહસ્રાભા ચન્દ્રકોટિનિભાનના ।
ગણેશકોટિલાવણ્યા વિષ્ણુકોટ્યરિમર્દિની ॥ ૩૫॥

દાવાગ્નિકોટિદલિની રુદ્રકોટ્યુગ્રરૂપિણી ।
સમુદ્રકોટિગમ્ભીરા વાયુકોટિમહાબલા ॥ ૩૬॥

આકાશકોટિવિસ્તારા યમકોટિભયઙ્કરી ।
મેરુકોટિસમુચ્છ્રાયા ગણકોટિસમૃદ્ધિદા ॥ ૩૭॥

નિષ્કસ્તોકા નિરાધરા નિર્ગુણા ગુણવર્જિતા ।
અશોકા શોકરહિતા તાપત્રયવિવર્જિતા ॥ ૩૮॥

વસિષ્ઠા વિશ્વજનની વિશ્વાખ્યા વિશ્વવર્દ્ધિની ।
ચિત્રા વિચિત્રા ચિત્રાઙ્ગી  હેતુગર્ભાકુલેશ્વરી ॥ ૩૯॥ var વિચિત્ર-ચિત્રાઙ્ગી
ઇચ્છાશક્તિઃ જ્ઞાનશક્તિઃ ક્રિયાશક્તિઃ શુચિસ્મિતા ।
શુચિઃ સ્મૃતિમયી સત્યા શ્રુતિરૂપા શ્રુતિપ્રિયા ॥ ૪૦॥

મહાસત્વમયી સત્વા પઞ્ચતત્ત્વોપરિસ્થિતા ।
પાર્વતી હિમવત્પુત્રી પારસ્થા પારરૂપિણી ॥ ૪૧॥

જયન્તી ભદ્રકાલી ચ અહલ્યા કુલનાયિકા ।  varજયન્તી ૩૦૦

ભૂતધાત્રી ચ ભૂતેશી ભૂતસ્થા ભૂતભાવિની ॥ ૪૨॥

મહાકુણ્ડલિનીશક્તિર્મહાવિભવર્દ્ધિની । var મહાકુણ્ડલિનીશક્તિઃ મહાવિભવર્દ્ધિની
હંસાક્ષી હંસરૂપા ચ હંસસ્થા હંસરૂપિણી ॥ ૪૩॥

સોમસૂર્યાગ્નિમધ્યસ્થા મણિમણ્ડલવાસિની ।
દ્વાદશારસરોજસ્થા સૂર્યમણ્ડલવાસિની ॥ ૪૪॥

અકલઙ્કા શશાઙ્કાભા ષોડશારનિવાસિની ।
ડાકિની રાકિની ચૈવ લાકિની કાકિની તથા ॥ ૪૫॥

શાકિની હાકિની ચૈવ ષટ્ ચક્રેષુ નિવાસિની ।
સૃષ્ટિ સ્થિતિવિનાશિની સૃષ્ટ્યન્તા સૃષ્ટિકારિણી ॥ ૪૬॥

શ્રીકણ્ઠપ્રિયા હૃતકણ્ઠા નન્દાખ્યા વિન્દુમાલિની ।
ચતુષ્ષષ્ટિ કલાધારા દેહદણ્ડસમાશ્રિતા ॥ ૪૭॥ var ચતુષ્ષટિ
માયા કાલી ધૃતિર્મેધા ક્ષુધા તુષ્ટિર્મહાદ્યુતિઃ ।
હિઙ્ગુલા મઙ્ગલા સીતા સુષુમ્નામધ્યગામિની ॥ ૪૮॥

પરઘોરા કરાલાક્ષી વિજયા જયદાયિની ।
હૃતપદ્મનિલયા ભીમા મહાભૈરવનાદિની ॥ ૪૯॥

આકાશલિઙ્ગસમ્ભૂતા ભુવનોદ્યાનવાસિની ।
મહત્સૂક્ષ્મા ચ કઙ્કાલી ભીમરૂપા મહાબલા ॥ ૫૦॥

મેનકાગર્ભસમ્ભૂતા તપ્તકાઞ્ચનસન્નિભા ।
અન્તરસ્થા ચ કૂટબીજા ચિત્રકૂટાચલવાસિની ॥ ૫૧॥

વર્ણાખ્યા વર્ણરહિતા પઞ્ચાશદ્વર્ણભેદિની ।
વિદ્યાધરી લોકધાત્રી અપ્સરા અપ્સરઃ પ્રિયા ॥ ૫૨॥

દીક્ષા દાક્ષાયણી દક્ષા દક્ષયજ્ઞવિનાશિની ।
યશઃપૂર્ણા યશોદા ચ યશોદાગર્ભસમ્ભવા ॥ ૫૩॥

દેવકી દેવમાતા ચ રાધિકા કૃષ્ણવલ્લભા ।
અરુન્ધતી શચીન્દ્રાણી ગાન્ધારી ગન્ધમાલિની ॥ ૫૪॥

ધ્યાનાતીતા ધ્યાનગમ્યા ધ્યાનજ્ઞા ધ્યાનધારિણી ।
લમ્બોદરી ચ લમ્બોષ્ઠી જામ્બવન્તી જલોદરી ॥ ૫૫॥

મહોદરી મુક્તકેશી મુક્તકામાર્થસિદ્ધિદા ।

તપસ્વિની તપોનિષ્ઠા સુપર્ણા ધર્મવાસિની ॥ ૫૬॥ var તપોનિષ્ઠા ૪૦૦
બાણચાપધરા ધીરા પાઞ્ચાલી પઞ્ચમપ્રિયા ।
ગુહ્યાઙ્ગી ચ સુભીમાઙ્ગી ગુહ્યતત્ત્વા નિરઞ્જના ॥ ૫૭॥

અશરીરા શરીરસ્થા સંસારાર્ણવતારિણી ।
અમૃતા નિષ્કલા ભદ્રા સકલા કૃષ્ણપિઙ્ગલા ॥ ૫૮॥

ચક્રપ્રિયા ચ ચક્રાહ્વા પઞ્ચચક્રાદિદારિણી ।
પદ્મરાગપ્રતીકાશા નિર્મલાકાશ સન્નિભા ॥ ૫૯॥

અધઃસ્થા ઊર્ધ્વરૂપા ચ ઊરધ્વપદ્મનિવાસિની ।
કાર્યકારણકર્તૃત્વે શશ્વદ્-રૂપેષુ-સંસ્થિતા ॥ ૬૦॥ var શશ્વદ્રૂપેષુસંસ્થિતા
રસજ્ઞા રસમધ્યસ્થા ગન્ધસ્થા ગન્ધરૂપિણી ।
પરબ્રહ્મસ્વરૂપા ચ પરબ્રહ્મનિવાસિની ॥ ૬૧॥

શબ્દબ્રહ્મસ્વરૂપા ચ શબ્દસ્થા શબ્દવર્જિતા ।
સિદ્ધિર્બુદ્ધિર્પરાબુદ્ધિઃ સન્દીપ્તિર્મધ્યસંસ્થિતા ॥ ૬૨॥ var સિદ્ધિઃ બુદ્ધિઃપરાબુદ્ધિઃ
સ્વગુહ્યા શામ્ભવીશક્તિઃ તત્ત્વસ્થા તત્ત્વરૂપિણી ।
શાશ્વતી ભૂતમાતા ચ મહાભૂતાધિપપ્રિયા ॥ ૬૩॥

શુચિપ્રેતા ધર્મસિદ્ધિઃ ધર્મવૃદ્ધિઃ પરાજિતા ।
કામસન્દીપની કામા સદાકૌતૂહલપ્રિયા ॥ ૬૪॥

જટાજૂટધરા મુક્તા સૂક્ષ્મા શક્તિવિભૂષણા ।
દ્વીપિચર્મપરીધાના ચીરવલ્કલધારિણી ॥ ૬૫॥

ત્રિશૂલડમરૂધરા નરમાલાવિભૂષણા ।
અત્યુગ્રરૂપિણી ચોગ્રા કલ્પાન્તદહનોપમા ॥ ૬૬॥

ત્રૈલોક્યસાધિની સાધ્યા સિદ્ધિસાધકવત્સલા ।
સર્વવિદ્યામયી સારા ચાસુરાણાં વિનાશિની ॥ ૬૭॥

દમની દામિની દાન્તા દયા દોગ્ધ્રી દુરાપહા ।
અગ્નિજિહ્વોપમા ઘોરાઘોર ઘોર તરાનના॥ ૬૮॥ var ઘોરાઘોર-ઘોર-તરાનના
નારાયણી નારસિંહી નૃસિંહહૃદયેસ્થિતા ।
યોગેશ્વરી યોગરૂપા યોગમાતા ચ યોગિની ॥ ૬૯॥

ખેચરી ખચરી ખેલા નિર્વાણપદસંશ્રયા ।
નાગિની નાગકન્યા ચ સુવેશા નાગનાયિકા ॥ ૭૦॥

વિષજ્વાલાવતી દીપ્તા કલાશતવિભૂષણા ।
તીવ્રવક્ત્રા મહાવક્ત્રા નાગકોટિત્વધારિણી ॥ ૭૧॥ ૫૦૦
મહાસત્વા ચ ધર્મજ્ઞા ધર્માતિસુખદાયિની ।
કૃષ્ણમૂર્દ્ધા મહામૂર્દ્ધા ઘોરમૂર્દ્ધા વરાનના ॥ ૭૨॥

સર્વેન્દ્રિયમનોન્મત્તા સર્વેન્દ્રિયમનોમયી ।
સર્વસઙ્ગ્રામજયદા સર્વપ્રહરણોદ્યતા ॥ ૭૩॥

સર્વપીડોપશમની સર્વારિષ્ટનિવારિણી ।
સર્વૈશ્વર્યસમુત્પન્ના સર્વગ્રહવિનાશિની ॥ ૭૪॥

માતઙ્ગી મત્તમાતઙ્ગી માતઙ્ગીપ્રિયમણ્ડલા ।
અમૃતોદધિમધ્યસ્થા કટિસૂત્રૈરલઙ્કૃતા ॥ ૭૫॥

અમૃતોદધિમધ્યસ્થા પ્રવાલવસનામ્બુજા ।
મણિમણ્ડલમધ્યસ્થા ઈષત્પ્રહસિતાનના ॥ ૭૬॥

કુમુદા લલિતા લોલા લાક્ષાલોહિતલોચના ।
દિગ્વાસા દેવદૂતી ચ દેવદેવાધિદેવતા ॥ ૭૭॥

સિંહોપરિસમારૂઢા હિમાચલનિવાસિની ।
અટ્ટાટ્ટહાસિની ઘોરા ઘોરદૈત્યવિનાશિની ॥ ૭૮॥

અત્યગ્રરક્તવસ્ત્રાભા નાગકેયૂરમણ્ડિતા ।
મુક્તાહારલતોપેતા તુઙ્ગપીનપયોધરા ॥ ૭૯॥

રક્તોત્પલદલાકારા મદાઘૂર્ણિતલોચના ।
સમસ્તદેવતામૂર્તિઃ સુરારિક્ષયકારિણી ॥ ૮૦॥

ખડ્ગિની શૂલહસ્તા ચ ચક્રિણી ચક્રમાલિની । repeated ખડ્ગિની
શઙ્ખિની ચાપિની બાણા વજ્રિણી વજ્રદણ્ડિની ॥ ૮૧॥ var ચાપિણી વાણા
આનન્દોદધતિમધ્યસ્થા કટિસૂત્રધારાપરા । var આનન્દોદધિમધ્યસ્થા
નાનાભરણદીપ્તાઙ્ગા નાનમણિવિભૂષિતા ॥ ૮૨॥

જગદાનન્દસમ્ભૂતા ચિન્તામણિગુણાન્વિતા ।
ત્રૈલોક્યનમિતા તુર્યા ચિન્મયાનન્દરૂપિણી ॥ ૮૩॥

ત્રૈલોક્યનન્દિનીદેવી દુઃખ દુઃસ્વપ્નનાશિની । var દુઃખ દુસ્વપ્નનાશિની

ઘોરાગ્નિદાહશમની રાજ્યદેવાર્થસાધિની ॥ ૮૪॥

મહાઽપરાધરાશિઘ્ની મહાચૌરભયાપહા ।
રાગાદિ દોષરહિતા જરામરણવર્જિતા ॥ ૮૫॥

ચન્દ્રમણ્ડલમધ્યસ્થા પીયૂષાર્ણવસમ્ભવા ।
સર્વદેવૈઃસ્તુતાદેવી સર્વસિદ્ધૈર્નમસ્કૃતા ॥ ૮૬॥

અચિન્ત્યશક્તિરૂપા ચ મણિમન્ત્રમહૌષધિ ।
અસ્તિસ્વસ્તિમયીબાલા મલયાચલવાસિની ॥ ૮૭॥

ધાત્રી વિધાત્રી સંહારી રતિજ્ઞા રતિદાયિની ।
રુદ્રાણી રુદ્રરૂપા ચ રુદ્રરૌદ્રાર્તિનાશિની ॥ ૮૮॥

સર્વજ્ઞાચૈવધર્મજ્ઞા રસજ્ઞા દીનવત્સલા ।
અનાહતા ત્રિનયના નિર્ભારા નિર્વૃતિઃપરા ॥ ૮૯॥

પરાઽઘોરા કરાલાક્ષી સુમતી શ્રેષ્ઠદાયિની ।
મન્ત્રાલિકા મન્ત્રગમ્યા મન્ત્રમાલા સુમન્ત્રિણી ॥ ૯૦॥ var મન્ત્રગમ્યા ૬૦૦
શ્રદ્ધાનન્દા મહાભદ્રા નિર્દ્વન્દ્વા નિર્ગુણાત્મિકા ।
ધરિણી ધારિણી પૃથ્વી ધરા ધાત્રી વસુન્ધરા ॥ ૯૧॥

મેરૂમન્દરમધ્યસ્થા સ્થિતિઃ શઙ્કરવલ્લભા ।
શ્રીમતી શ્રીમયી શ્રેષ્ઠા શ્રીકરી ભાવભાવિની ॥ ૯૨॥

શ્રીદા શ્રીમા શ્રીનિવાસા શ્રીવતી શ્રીમતાઙ્ગતિઃ । var શ્રીશા
ઉમા સારઙ્ગિણી કૃષ્ણા કુટિલા કુટિલાલિકા ॥ ૯૩॥

ત્રિલોચના ત્રિલોકાત્મા પુણ્યાપુણ્યપ્રકીર્તિતા પુણ્યપુણ્યાપ્રકીર્તિતા । var પુણ્યપુણ્યાપ્રકીર્તિતા
અમૃતા સત્યસઙ્કલ્પા સા સત્યા ગ્રન્થિભેદિની ॥ ૯૪॥

પરેશી પરમાસાધ્યા પરાવિદ્યા પરાત્પરા ।
સુન્દરાઙ્ગી સુવર્ણાભા સુરાસુરનમસ્કૃતા ॥ ૯૫॥

પ્રજા પ્રજાવતી ધાન્યા ધનધાન્યસમૃદ્ધિદા ।
ઈશાની ભુવનેશાની ભવાની ભુવનેશ્વરી ॥ ૯૬॥

અનન્તાનન્તમહિતા જગત્સારા જગદ્ભવા ।
અચિન્ત્યાત્માચિન્ત્યશક્તિઃ ચિન્ત્યાચિન્ત્યસ્વરૂપિણી ॥ ૯૭॥

જ્ઞાનગમ્યા જ્ઞાનમૂર્તિઃ જ્ઞાનિની જ્ઞાનશાલિની ।

અસિતા ઘોરરૂપા ચ સુધાધારા સુધાવહા ॥ ૯૮॥

ભાસ્કરી ભાસ્વરી ભીતિર્ભાસ્વદક્ષાનુશાયિની ।
અનસૂયા ક્ષમા લજ્જા દુર્લભાભરણાત્મિકા ॥ ૯૯॥

વિશ્વઘ્ની વિશ્વવીરા વ વિશ્વાશા વિશ્વસંસ્થિતા ।
શીલસ્થા શીલરૂપા ચ શીલા શીલપ્રદાયિની ॥ ૧૦૦॥

બોધિની બોધકુશલા રોધિનીબોધિની તથા ।
વિદ્યોતિની વિચિત્રાત્મા વિદ્યુત્પટલસન્નિભા ॥ ૧૦૧॥

વિશ્વયોનિર્મહાયોનિઃ કર્મયોનિઃ પ્રિયાત્મિકા ।
var?વિશ્વયોનિઃ મહાયોનિઃ કર્મયોનિઃ પ્રિયાત્મિકા
રોહિણી રોગશમની મહારોગજ્વરાપહા ॥ ૧૦૨॥

રસદા પુષ્ટિદા પુષ્ટિર્માનદા માનવપ્રિયા । var પુષ્ટિઃ માનદા
કૃષ્ણાઙ્ગવાહિની કૃષ્ણાઽકલા કૃષ્ણસહોદરા ॥ ૧૦૩॥ var કૃષ્ણાઽકલા ૬૯૯ ૭૦૦
શામ્ભવી શમ્ભુરૂપા ચ શમ્ભુસ્થા શમ્ભુસમ્ભવા ।
વિશ્વોદરી યોગમાતા યોગમુદ્રા સુયોગિની ॥ ૧૦૪॥

વાગીશ્વરી યોગનિદ્રા યોગિનીકોટિસેવિતા ।
કૌલિકા નન્દકન્યા ચ શ઼ૃઙ્ગારપીઠવાસિની ॥ ૧૦૫॥

ક્ષેમઙ્કરી સર્વરૂપા દિવ્યરૂપા દિગમ્બરી ।
ધૂમ્રવક્ત્રા ધૂમ્રનેત્રા ધૂમ્રકેશી ચ ધૂસરા ॥ ૧૦૬॥

પિનાકી રુદ્રવેતાલી મહાવેતાલરૂપિણી ।
તપિની તાપિની દીક્ષા વિષ્ણુવિદ્યાત્મનાશ્રિતા ॥ ૧૦૭॥

મન્થરા જઠરા તીવ્રાઽગ્નિજિહ્વા ચ ભયાપહા ।
પશુઘ્ની પશુપાલા ચ પશુહા પશુવાહિની ॥ ૧૦૮॥

પિતામાતા ચ ધીરા ચ પશુપાશવિનાશિની ।
ચન્દ્રપ્રભા ચન્દ્રરેખા ચન્દ્રકાન્તિવિભૂષિણી ॥ ૧૦૯॥

કુઙ્કુમાઙ્કિતસર્વાઙ્ગી સુધાસદ્ગુરુલોચના ।
શુક્લામ્બરધરાદેવી વીણાપુસ્તકધારિણી ॥ ૧૧૦॥

ઐરાવતપદ્મધરા શ્વેતપદ્માસનસ્થિતા ।
રક્તામ્બરધરાદેવી રક્તપદ્મવિલોચના ॥ ૧૧૧॥

દુસ્તરા તારિણી તારા તરુણી તારરૂપિણી ।
સુધાધારા ચ ધર્મજ્ઞા ધર્મસઙ્ઘોપદેશિની ॥ ૧૧૨॥

ભગેશ્વરી ભગારાધ્યા ભગિની ભગનાયિકા ।
ભગબિમ્બા ભગક્લિન્ના ભગયોનિર્ભગપ્રદા ॥ ૧૧૩॥ var ભગયોનિઃ ભગપ્રદા
ભગેશી ભગરૂપા ચ ભગગુહ્યા ભગાવહા ।
ભગોદરી ભગાનન્દા ભગસ્થા ભગશાલિની ॥ ૧૧૪॥

સર્વસઙ્ક્ષોભિણીશક્તિઃ સર્વવિદ્રાવિણી તથા ।
માલિની માધવી માધ્વી મધુરૂપા મહોત્કટા ॥ ૧૧૫॥

ભેરુણ્ડા ચન્દ્રિકા જ્યોત્સ્ના વિશ્વચક્ષુસ્તમોઽપહા । var વિશ્વચક્ષુસ્તમોપહા
સુપ્રસન્ના મહાદૂતી યમદૂતી ભયઙ્કરી ॥ ૧૧૬॥

ઉન્માદિની મહારૂપા દિવ્યરૂપા સુરાર્ચિતા ।
ચૈતન્યરૂપિણી નિત્યા ક્લિન્ના કામમદોદ્ધતા ॥ ૧૧૭॥

મદિરાનન્દકૈવલ્યા મદિરાક્ષી મદાલસા । var મદિરાક્ષી ૮૦૦
સિદ્ધેશ્વરી સિદ્ધવિદ્યા સિદ્ધાદ્યા સિદ્ધસમ્ભવા ॥ ૧૧૮॥

સિદ્ધર્દ્ધિઃ સિદ્ધમાતા ચ સિદ્ધઃસર્વાર્થસિદ્ધિદા ।
મનોમયી ગુણાતીતા પરઞ્જ્યોતિઃસ્વરૂપિણી ॥ ૧૧૯॥

પરેશી પરગાપારા પરાસિદ્ધિઃ પરાગતિઃ ।
વિમલા મોહિની આદ્યા મધુપાનપરાયણા ॥ ૧૨૦॥

વેદવેદાઙ્ગજનની સર્વશાસ્ત્રવિશારદા ।
સર્વદેવમયીવિદ્યા સર્વશાસ્ત્રમયી તથા ॥ ૧૨૧॥

સર્વજ્ઞાનમયીદેવી સર્વધર્મમયીશ્વરી ।
સર્વયજ્ઞમયી યજ્ઞા સર્વમન્ત્રાધિકારિણી ॥ ૧૨૨॥

સર્વસમ્પત્પ્રતિષ્ઠાત્રી સર્વવિદ્રાવિણી પરા ।
સર્વસઙ્ક્ષોભિણીદેવી સર્વમઙ્ગલકારિણી ॥ ૧૨૩॥

ત્રૈલોક્યાકર્ષિણી દેવી સર્વાહ્લાદનકારિણી ।
સર્વસમ્મોહિનીદેવી સર્વસ્તમ્ભનકારિણી ॥ ૧૨૪॥

ત્રૈલોક્યજૃમ્ભિણી દેવી તથા સર્વવશઙ્કરી ।
ત્રૈલોક્યરઞ્જનીદેવી સર્વસમ્પત્તિદાયિની ॥ ૧૨૫॥

સર્વમન્ત્રમયિદેવી સર્વદ્વન્દ્વક્ષયઙ્કરી ।
સર્વસિદ્ધિપ્રદાદેવી સર્વસમ્પત્પ્રદાયિની ॥ ૧૨૬॥

સર્વપ્રિયઙ્કરીદેવી સર્વમઙ્ગલકારિણી ।
સર્વકામપ્રદાદેવી સર્વદુઃખવિમોચિની ॥ ૧૨૭॥

સર્વમૃત્યુપ્રશમની સર્વવિઘ્નવિનાશિની ।
સર્વાઙ્ગસુન્દરીમાતા સર્વસૌભાગ્યદાયિની ॥ ૧૨૮॥

સર્વજ્ઞા સર્વશક્તિશ્ચ સર્વૈશ્વર્યફલપ્રદા ।
સર્વજ્ઞાનમયીદેવી સર્વવ્યાધિવિનાશિની ॥ ૧૨૯॥

સર્વાધારસ્વરૂપા ચ સર્વપાપહરા તથા ।
સર્વાનન્દમયીદેવી સર્વેચ્છાયાઃસ્વરૂપિણી ॥ ૧૩૦॥

સર્વલક્ષ્મીમયીવિદ્યા સર્વેપ્સિતફલપ્રદા ।
સર્વારિષ્ટપ્રશમની પરમાનન્દદાયિની ॥ ૧૩૧॥

ત્રિકોણનિલયા ત્રિસ્થા ત્રિમાતા ત્રિતનુસ્થિતા ।
ત્રિવેણી ત્રિપથા ગુણ્યા ત્રિમૂર્તિઃ ત્રિપુરેશ્વરી ॥ ૧૩૨॥

ત્રિધામ્ની ત્રિદશાધ્યક્ષા ત્રિવિત્ત્રિપુરવાસિની ।
ત્રયીવિદ્યા ચ ત્રિશિરા ત્રૈલોક્યા ચ ત્રિપુષ્કરા ॥ ૧૩૩॥

ત્રિકોટરસ્થા ત્રિવિધા ત્રિપુરા ત્રિપુરાત્મિકા ।
ત્રિપુરાશ્રી ત્રિજનની ત્રિપુરાત્રિપુરસુન્દરી ॥ ૧૩૪॥

મહામાયા મહામેધા મહાચક્ષુઃ મહોક્ષજા ।
મહાવેધા પરાશક્તિઃ પરાપ્રજ્ઞા પરમ્પરા ॥ ૧૩૫॥

મહાલક્ષ્યા મહાભક્ષ્યા મહાકક્ષ્યાઽકલેશ્વરી । var મહાકક્ષ્યાઽકલેશ્વરી ૯૦૦ ૯૦૧
કલેશ્વરી કલાનન્દા કલેશી કલસુન્દરી ॥ ૧૩૬॥

કલશા કલશેશી ચ કુમ્ભમુદ્રા કૃશોદરી ।varકૃષોદરી
કુમ્ભપા કુમ્ભમધ્યેશી કુમ્ભાનન્દપ્રદાયિની ॥ ૧૩૭॥

કુમ્ભજાનન્દનાથા વ કુમ્ભજાનન્દવર્દ્ધિની ।
કુમ્ભજાનન્દસન્તોષા કુમ્ભજતર્પિણીમુદા ॥ ૧૩૮॥

વૃત્તિઃ વૃત્તીશ્વરીઽમોઘા વિશ્વવૃત્ત્યન્તતર્પિણી ।
વિશ્વશાન્તિ વિશાલાક્ષી મીનાક્ષી મીનવર્ણદા ॥ ૧૩૯॥

વિશ્વાક્ષી દુર્ધરા ધૂમા ઇન્દ્રાક્ષી વિષ્ણુસેવિતા ।
વિરઞ્ચિસેવિતા વિશ્વા ઈશાના ઈશવન્દિતા ॥ ૧૪૦॥

મહાશોભા મહાલોભા મહામોહા મહેશ્વરી ।
મહાભીમા મહાક્રોધા મન્મથા મદનેશ્વરી ॥ ૧૪૧॥

મહાનલા મહાક્રોધા વિશ્વસંહારતાણ્ડવા । repeated મહાક્રોધા
સર્વસંહારવર્ણેશી સર્વપાલનતત્પરા ॥ ૧૪૨॥

સર્વાદિઃ સૃષ્ટિકર્ત્રી ચ શિવાદ્યા શમ્ભુસ્વામિની ।
મહાનન્દેશ્વરી મૃત્યુર્મહાસ્પન્દેશ્વરી સુધા ॥ ૧૪૩॥ var મૃત્યુઃ મહાસ્પન્દેશ્વરી
પર્ણાપર્ણ પરાવર્ણાઽપર્ણેશી પર્ણમાનસા ।
વરાહી તુણ્ડદા તુણ્ડા ગણેશી ગણનાયિકા ॥ ૧૪૪॥

વટુકા વટુકેશી ચ ક્રૌંચદારણજન્મદા ।
ક એ ઇ લ મહામાયા હ સ ક હ લ માયયા ॥ ૧૪૫॥

દિવયાનામા સદાકામા શ્યામા રામા રમા રસા ।
સ ક લ હ્રીં તત્સ્વરૂપા ચ । શ્રીં હ્રીં નામાદિ રૂપિણી ॥ ૧૪૬॥

કાલજ્ઞા કાલહામૂર્તિઃ સર્વસૌભાગ્યદા મુદા ।
ઉર્વા ઉર્વેશ્વરી ખર્વા ખર્વપર્વા ખગેશ્વરી ॥ ૧૪૭॥

ગરુડા ગારુડીમાતા ગરુડેશ્વરપૂજિતા ।
અન્તરિક્ષાન્તરપદા પ્રજ્ઞા પ્રજ્ઞાનદા પરા ॥ ૧૪૮॥

વિજ્ઞાના વિશ્વવિજ્ઞાના અન્તરાક્ષા વિશારદા ।
અન્તર્જ્ઞાનમયી સૌમ્યા મોક્ષાનન્દવિવર્દ્ધિની ॥ ૧૪૯॥

શિવશક્તિમયીશક્તિઃ એકાનન્દપ્રવર્તિની ।
શ્રીમાતા શ્રીપરાવિદ્યા સિદ્ધાશ્રી સિદ્ધસાગરા ।
સિદ્ધલક્ષ્મી સિદ્ધવિદ્યા સિદ્ધા સિદ્ધેશ્વરી સુધા ॥ ૧૫૦॥ var સુધા ૧૦૦૯

॥ ફલશ્રુતિઃ ॥

ઇદં ત્રિપુરાસુન્દર્યાઃ સ્તોત્રનામસહસ્રકમ્ ।
ગુહ્યાદ્ગુહ્યતરં પુત્ર! તવ પ્રીત્યૈ પ્રકીર્તિતમ્ ॥ ૧॥

ગોપનીયં પ્રયત્નેન પઠનીયં પ્રયત્નતઃ ।

નાતઃ પરતરં પુણ્યં નાતઃપરતરં તપઃ ॥ ૨॥

નાતઃ પરતરં સ્તોત્રં નાતઃ પરતરં ગતિઃ ।
સ્તોત્રં સહસ્રનામાખ્યં મમ વક્ત્રાદ્વિનિર્ગતમ્ ॥ ૩॥

યઃ પઠેત્પ્રયતો ભક્ત્યા શૃણુયાદ્વા સમાહિતઃ ।
મોક્ષાર્થી લભતે મોક્ષં સ્વર્ગાર્થી સ્વર્ગમાપ્નુયાત્ ॥ ૪॥

કામાંશ્ચ પ્રાપ્નુયાતકામી ધનાર્થી ચ લભેદ્ધનમ્ ।
વિદ્યાર્થી લભતે વિદ્યાં યશોઽર્થી લભતે યશઃ ॥ ૫॥

કન્યાર્થી લભતે કન્યાં સુતાર્થી લભતે સુતમ્ ।
ગુર્વિણી જનયેત્પુત્રં કન્યા વિન્દતિ સત્પતિમ્ ॥ ૬॥

મૂર્ખોઽપિ લભતે શાસ્ત્રં હીનોઽપિ લભતે ગતિમ્ ।
સઙ્ક્રાન્ત્યાં વાર્કામાવસ્યાં અષ્ટમ્યાં ચ વિશેષતઃ ॥ ૭॥

પૌર્ણમાસ્યાં ચતુર્દશ્યાં નવમ્યાં ભૌમવાસરે ।
પઠેદ્વા પાઠયેદ્વાપિ શૃણુયાદ્વા સમાહિતઃ ॥ ૮॥ var શૃણુયાદ્ વા સમાહિતઃ
સ મુક્તો સર્વપાપેભ્યઃ કામેશ્વરસમો ભવેત્ ।
લક્ષ્મીવાન્ ધર્મવાંશ્ચૈવ વલ્લભસ્સર્વયોષિતામ્ ॥ ૯॥

તસ્ય વશ્યં ભવેદાશુ ત્રૈલોક્યં સચરાચરમ્ ।
રુદ્રં દૃષ્ટ્વા યથા દેવા વિષ્ણું દૃષ્ટ્વા ચ દાનવાઃ ॥ ૧૦॥ varદૃષ્ટા
યથાહિર્ગરુડં દૃષ્ટ્વા સિંહ દૃષ્ટ્વા યથા ગજાઃ ।
કીટવત્પ્રપલાયન્તે તસ્ય વક્ત્રાવલોકનાત્ ॥ ૧૧॥

અગ્નિચૌરભયં તસ્ય કદાચિન્નૈવ સમ્ભવેત્ ।
પાતકા વિવિધાઃ શન્તિર્મેરુપર્વતસન્નિભાઃ ॥ ૧૨॥

યસ્માત્તચ્છૃણુયાદ્વિદ્વાંસ્તૃણં વહ્નિહુતં યથા ।
એકદા પઠનાદેવ સર્વપાપક્ષયો ભવેત્ ॥ ૧૩॥

દશધા પઠનાદેવ વાચા સિદ્ધઃ પ્રજાયતે ।
શતધા પઠનાદ્વાપિ ખેચરો જાયતે નરઃ ॥ ૧૪॥

સહસ્રદશસઙ્ખ્યાતં યઃ પઠેદ્ભક્તિમાનસઃ ।
માતાઽસ્ય જગતાં ધાત્રી પ્રત્યક્ષા ભવતિ ધ્રુવમ્ ॥ ૧૫॥

લક્ષપૂર્ણે યથા પુત્ર! સ્તોત્રરાજં પઠેત્સુધીઃ ।

ભવપાશવિનિર્મુક્તો મમ તુલ્યો ન સંશયઃ ॥ ૧૬॥

સર્વતીર્થેષુ યત્પુણ્યં સકૃજ્જપ્ત્વા લભેન્નરઃ ।
સર્વવેદેષુ યત્પ્રોક્તં તત્ફલં પરિકીર્તિતમ્ ॥ ૧૭॥
ભૂત્વા ચ બલવાન્ પુત્ર ધનવાન્સર્વસમ્પદઃ ।
દેહાન્તે પરમં સ્થાનં યત્સુરૈરપિ દુર્લભમ્ ॥ ૧૮॥

સ યાસ્યતિ ન સન્દેહઃ સ્તવરાજસ્ય કિર્ત્તનાત્ ॥ ૧૯॥

॥ ઇતિ શ્રીવામકેશ્વરતન્ત્રે ષોડશ્યાઃ સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Pankaj Dubey dr.pankaj.dubey at gmail.com
Proofread by PSA Easwaran

*shrIShoDashIsahasranAmastotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*